In Public domain. Digitization Muthulakshmi Research Academy

कुक्कुटी कालोत्तरम् ॥

प्रथमं मन्त्रोद्धारपटलः ॥

ओंनमः शिवाय ह्रीं शिवायैनमः। श्रीमदरुणाचलाय नमः॥

कार्तिकेय उवाच ॥

अल्पायुषस्त्विमे मर्त्या अल्पवीर्य पराक्रमाः ।
अल्पसत्वाल्पविद्याश्च ह्यल्पमोहसमन्विताः ॥ 1.
अल्पपुत्रधनं मर्त्यं च पक्षीर्यैवैकसंयुक्तम् ।
वक्तुमर्हसि देवेशानुग्रहार्थं मम प्रभो ॥ 2.

ईश्वर उवाच ॥

अथातः संप्रवक्ष्यामि शास्त्रसद्भाव मुत्तमम् ।
वामन ... तत्राद्यंवो घृतमिवोद्धृतम् ॥ 3.
मधुवच्च यथा पुष्पात् सारात्सारमिदं शुभम् ।
नानारूपं यत्परं बीजम् सर्वभूतेष्ववस्थितम् ॥ 4.
तं विदित्वा महादेवं देहीवः पाशहा भवेत् ।
आशापाशाद्यनापाशा मैथुना ... त ... ॥ 5
अक्षरं ब्रह्मगतासत्वास्तेषि तत्वंप्रवर्तितम् ।
सथूलं सूक्ष्मं परं ज्ञात्वा कर्म कुर्याद्यथेप्सितम् ॥ 6.
सथूलं शब्दइति प्रोक्तम् सूक्ष्मं चिन्तामयं भवेत् ।
चिन्ताया रहितं यत्तु तत्परं परिकीर्तितम् ॥ 7.
एवं ज्ञात्वैव मन्त्रस्य सर्वपापक्षयो भवेत् ।

In Public domain. Digitization Muthulakshmi Research Academy

यवर्गार्द्धयुक्तं बीजम् मात्रैर्द्वादशभिः स्वैतम् ॥ 8.
अक्षरावलिते . . . ।सबिन्दुं शिरोवौ भवेत् ।
प्रथमं हृदयं विद्याद्द्वितीयन्तु शिरस्स्मृतम् ॥ 9.
तृतीयन्तु शिखा चतुर्थं कवचं भवेत् ।
पञ्चमन्तु नेत्रं विद्यात्षष्ठमस्त्रं विसर्गजम् ॥ 10.
षड्भिर्मन्त्रैस्तु कथितम् शिवेन परमात्मना ।
अस्य कुल्या प्रवक्ष्यामि येन सिद्धिं लभेन्नरः ॥ 11.
तत्रादौ संस्मरेत्पादौ द्वौ तस्यौ याव्यमस्तकम् ।
राधा कुल्या महाकुल्या सर्वकामार्थ साधिका ॥ 12.
कारन्यासं पुरा कृत्वा कुर्याद्ध्यानं विचक्षणः ॥
इति श्रीमद्भानुभैरवे त्रिशक्तिकोलतंत्रे महातन्त्रे
मन्त्रोद्धारपटलः प्रथमः ॥

— ४ —

यजनम् ॥
यजनं संप्रवक्ष्यामि यथावदनुपूर्वशः ।
हृदयं कर्णिकापद्मं पर्यङ्कासनमेव तत् ॥ 1.
वैराग्यं च तथैश्वर्यं हृदयप्रभे विनक्षयेत् ।
केसरेष्वष्टकस्थो ऽयं हृदयेन तु पूजयेत् ॥ 2.
आवाह्येत्ततो देवं हृदयेन तु साधकः ।
स्वागतं पाद्यमर्घ्यं च स्नानमीयं च अवन्दितं ॥ 3.

In Public domain. Digitization Muthulakshmi Research Academy

सनपत्रं पूजनमेव लक्ष्मेण तु कारयेत् ।
लक्ष्मेणैव तत्सर्वम् यत्किंचिद्विधियोदितम् ॥ 4.
राकावरणमेतत्तु सर्वकामार्थ साधकम् ।
सर्वतत्रेषु सामान्यम् सर्वज्ञानेषु सम्मतम् ॥ 5.
इति श्रीमद्विद्याति कालोत्तरे पूजनपत्रोद्धृतोद्धृतोद्धृत

In Public domain. Digitization Muthulakshmi Research Academy

रक्षाबन्धनकैतन्तु सर्वकामार्थसाधकम् ।
पवित्रकं वाहयेद्द्वारम् सिद्धिकामस्समाहितः ॥3
अग्नेरग्न्यां कारयेत्कुण्डम् हस्तमात्रं समन्ततः ।
यजनकर्म विधिं कुर्यात् सुरभिकुंडे हुताशने ॥4
अग्नेरग्न्यां हृदयव्यस्य दीक्षान्यासन्तु शिरोव्यसेत् ।
वर्मेऽस्त्रान्तु शिखां विद्याद्धायव्यां कवचन्यसेत् ॥5.
अस्त्रविद्युक्तु चविन्यस्य कर्णिकायां सदाशिवम् ।
संक्षेपेण मयाख्यातम् विधानं परिकीर्तितम् ॥6.
अनुक्तं यद्भवेत्किञ्चित् तत्सर्वं मूलमाश्रयेत् ।
एवं विधि विधानज्ञो कुर्याद्दीक्षां समाचरेत् ॥7.

इतिश्रीसद्विशिवाख्ये कालोत्तरे मण्डलविधिपटलश्चतुर्थः ॥

— ४ —

ग्रं. 27½.

दीक्षा ॥

अथ दीक्षां प्रवक्ष्यामि पञ्चतत्वव्यवस्थितम् ।
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥1.
एतानि पञ्चतत्वानि यैर्व्याप्तमखिलं जगत् ।
सर्वतत्वानि तत्रैव दृष्टव्यानि तु दैशिकैः ॥2.
अज्ञात्वैतानि तत्वानि यो दीक्षां कर्तुमिच्छति ।
वृथा परिश्रमस्तस्य नैतत्फलमवाप्नुयात् ॥3
निवृत्तिः पृथिवी ज्ञेया प्रतिष्ठाह्यप उच्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

विद्या तेजो मयी प्रोक्ता वायुरशान्तिश्च कीर्तिता ॥ 4.
शान्त्यतीतं परं व्योम तत्परं शान्तमव्ययम् ।
तं विधित्वा महादेव स्थावरानपि दीक्षयेत् ॥ 5.
निवृत्तिं हृदयेनैव प्रतिष्ठां शिरसा बुधः ।
विद्यातत्वं च शिखया शान्तिं कवचेन तु ॥ 6.
शान्त्यतीतं परं व्योम प्रासादेन तु लोकयेत् ।
एकैकस्य शतं होमम् पश्चात्पूर्णाहुतिं तदा ॥ 7.
एवं समाप्यते दीक्षा जननाद्धि विवर्जिता ।
मुक्तैर्वैव तु मुच्यन्ते साधका ह्यक्तबन्धनात् ॥ 8.
अप्रकाश्यमिदं गुह्यं गोपनीयं प्रयत्नतः ।
रहस्यं सर्वतन्त्राणामिदं संस्कारमुत्तमम् ॥ 9.
एवं संस्कारहृद्दस्य शिवत्वं जायते ध्रुवम् ।

कार्तिकेय उवाच ॥

विस्तरं त्वज्जकेनेह संक्षेपात्कथयस्व मे ॥ 10
केन विज्ञानमात्रेण पशुबन्धो विमुच्यति क्षणात् ।

ईश्वर उवाच ॥

शृणु षण्मुख तत्त्वेन येन मोक्षो भवेद्ध्रुवम् ॥ 11.
प्रयोगेण तु सूक्ष्मेण योगदृष्टेन चक्षुषा ।
योगमार्गेण दिव्येन प्रेर्यते समहात्मना
तं विदित्वा महादेव जीवं वायुमयं बुधः ।

In Public domain. Digitization Muthulakshmi Research Academy

विषुवेन तु योगेन योजयेद्धृदयस्थले ॥ 13
योगस्तु विषुवं प्राप्य को न मुच्येत बन्धनात् ।
इति भीमसंहितायां हंसेश्वरी कालोत्तरे महा-
तन्त्रे दीक्षापटलः षष्ठः ॥ ⟹ क. 41.

— x —

नाडीचक्रम् ॥

नाडीचक्रविधिं सूक्ष्मम् प्रवक्ष्यामि यथाक्रमं ॥
नाभेरधस्ताद्यत्कन्दमण्डाकारं तत्र निर्मिता ॥ 1.
द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः ।
तिर्यगूर्ध्वमधश्चैव व्याप्नुवन्ति तु सर्वदा ॥ 2.
चक्रावसंस्थितास्त्वेता नाड्यः परिकीर्तिताः ।
इडा च पिङ्गला चैव सुषुम्ना च तृतीयका ॥ 3.
गान्धारी हस्तिजिह्वा च पूषा चैव यशा तथा ।
अलम्बुषा कुहूश्चैव शङ्खिनी दशमी स्मृता ॥ 4.
एता प्राणवहास्त्वेता नाड्यः परिकीर्तिताः ।
प्राणोऽपानस्समानश्चोदानोपि व्यान एव च ॥ 5.
नागः कूर्मोथ कृकरो देवदत्तो धनञ्जयः ।
प्राणस्तु प्रथमो वायुर्वर्तते हृदये सदा ॥ 6.
प्राणः प्राणमयः प्राणो विसर्गाघूरणं प्रति ।
नेत्रयोर्घूरणेनैव प्राणिनां कुपरि स्थितः ॥ 7.

In Public domain. Digitization Muthulakshmi Research Academy

विश्वासो च्छ्वास कार्यस्तु प्राणो जीवस्समाश्रितः।
प्रयाणं कुरुते यस्मात्तस्मात्प्राणः प्रकीर्तितः ॥ 8.
अपानयत्यपानस्तु आहारं मलभावकः ।
शुक्रमूत्र वहोवायुरपानस्तेन कीर्तितः ॥ 9.
पीतं भक्षितमाघ्रातरक्तपित्तकफानि च
समनयति गात्रेषु समानो वात मारुतः ॥ 10.
स्पन्दयत्यधरं वक्त्रं नेत्रगात्र प्रकोपनम् ।
उद्वेजयति कर्माणि उदानो वात मारुतः ॥ 11.
व्यानो विनामयत्यङ्गम् व्यानो व्याधि प्रकोपनः।
प्रीते र्विनाशनः व्यानो वार्धक्याच्छ्वन उच्यते ॥ 12.
प्राणाद्यावायवः प्रोक्ता नागाद्याः प्रोच्यते ऽधुना ।
उद्गारे नाग इत्युक्तः कूर्म उन्मीलने स्थितः ॥ 13.
कृकरः क्षुधितेचैव देवदत्तो विजृम्भणे ।
धनञ्जयस्थितो घोषे मृतत्वापि न मुञ्चति ॥ 14.
इत्येतद्वायुवृन्दं हृदि हृदि निहितं नाभिचक्रप्रतिष्ठ-
विश्वासोच्छ्वास कार्यैः श्वसन उर अधः [illegible] धूर्णितैश्च।
[illegible] ति यौवं बाल भावे
चाक्रान्ते वायुरेको विधुनन सरणैः क्रीडते सर्वसत्वैः॥ 15
नाडी चक्रं यथावत्स्थम् तावरिवऋम् ।
50. 6. . . . सारं चक्रमेतत्तु विभागो भावते तथा ॥ 16.

In Public domain. Digitization Muthulakshmi Research Academy

T. 317.7

चक्रेण क्रीडयते जीवो दशरूपीनेष्वनुक्रमात् ।
जी॰ जीवलोकरूप ... वैष्णवे ... ॥ 17
दश॰ ... क्रीडते यैव तेन चक्रं प्रकीर्तितम् ।
वाजीचक्रमिति ख्यातम् ... क्रमेतरूपमा ॥ 18
कार्तिकेय उवाच ।
स जीवी जीवलोकस्य तत्वतो ब्रूहते यथा ।
संशयो मे महाबाहो प्रलयी भव ईश्वर ॥ 19.
ईश्वर उवाच ।
जीवरूप पुरुषाख्यस्य कर्मनं शृणु षण्मुख ।
कथयामि न सन्देहः पुत्रत्वेत्यभिशोषत॰ ॥ 20
स सङ्क्रान्तिर्विधुर्नैव औशरात्राद्यवाप्तिषु ।
अधिमासतृणं नैव औसरात्रं बलाद्यो
औसरात्रं यदैवैक्ष्णा अधिमासो विभूक्षत॰ ।
क्षणं चात्र यदैवैक्षो ब्रह्मुरुच्यते ॥ 22.
उत्तरं दक्षिणं शोधम् वामदक्षिण संज्ञितम् ।
मध्ये तु विधुं प्रोक्तम् पुरुषं विविरूपितम् ॥ 23
सङ्क्रान्तिः पुनरुच्यैव स्थानात्स्थान योगतः ।
इडा चैव सुषुम्नाच अमावा च समन्विता ॥ 24.
सुषुम्ना मध्यमे क्षेत्रे इडा वामे प्रतिष्ठिता ।
मार्गे दक्षिणे रूपवद् यत्र सङ्क्रान्तिरुच्यते ॥ 25.

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्ध्वं प्राणोऽह्यधश्चैव अपानो रात्रिरेव च ।
विष्णुब्रह्मेश प्राणत्वं यो वेत्तेवं स वेदवित् ॥ 26.
प्राणायामं सकलमेव कथयामि तवाधुना ।
उच्चारयीत प्रणवम् रुद्रैरेकैक मन्त्रवित् ॥ 27
उकारं पूरयेत्तावद्वायुना यावदीश्वितम् ।
प्राणाद्यायो ब्रह्मविष्णवः पूरको ह्येत पूरकः ॥ 28
पिधाय सर्वद्वाराणि निश्वासोच्छ्वास वर्जितः ।
सम्पूर्णकुम्भवन्निष्ठेत् प्राणायामस्तु कुम्भकः ॥ 29
कुञ्चेद्गुदं ततस्तूर्ध्वम् रुद्रैरेकैक मन्त्रवित् ।
उच्छ्वास योग युक्तस्तु वायुमूर्ध्वं विरेचयेत् ॥ 30.
रेचकस्त्वेष विख्यातः प्राण संहार कारकः ।
योसौ लिङ्गस्थितः पद्म अधोमुखमवस्थितम् ॥ 31
विकसितं सर्वं पद्म पूरकेण तु पूरितः ।
ऊर्ध्वस्रोतो भवेत्पद्म ऊर्ध्वमेकेन तु रोधितः ॥ 32.
रेचकेन तु आहितः सद्यः प्राणत्वेन तु ।
मुक्त्वा लिङ्गं च पद्मन्तु ऊर्ध्वस्रोतो व्यवस्थितः ॥ 33
रोधितो गच्छति तूर्ध्वम् सर्वमीश्वित्वा क्रमेण तु ।
त्यक्त्वा कपाल मारुह्य जीवोत्तूर्ध्वं तु रोधितः ॥ 34.
सदाशिव पदं गत्वा न भूयो जन्म चाप्नुयात् ।
आभासः क्रियते तस्य नान्यद्वा तु कदाचन ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

स जीवो जीवलोकस्य मया प्रोक्तस्समासतः ।
उत्पद्यते स्वयं यस्मात् स्वदेहाविस्थितस्शिवः ॥ 36
तस्मात्तत्वविदां वत्स अपव जप उच्यते ।
अयुते द्वे सहस्रैक षट्शतानि तथैव च ॥ 37.
अहोरात्रेण योगीन्द्रो जपमन्त्रं करोति सः ॥

इति श्रीमत्कालोत्तरे महा-
तन्त्रे जीवोत्पत्तिप्रकरणं षष्ठः ॥ ← ६, 78½.

— ७ —

भावसद्भावम् ॥

अतः परं प्रवक्ष्यामि भावसद्भावमुत्तमम् ।
येन विज्ञानमात्रेण मुच्यन्ति वा पुनस्तनुम् ॥ 1.
दृश्यैरदृश्यसंकल्पो योगी निष्कल्प एव हि ।
आत्मा केवलमात्मस्थो सर्वतः किमपि स्थितः ॥ 2.
51. a त्वं सत्वमिति यो ब्रूयाद्ध्वंसो ह्येवस्समाहितः ।
गुरुवक्त्रात्तु लभेत प्रत्यक्षं सर्वतोमुखम् ॥ 3.
तिलेषु च यथा तैलम् पुष्पे गन्धस्समाश्रितः ।
पुरुषस्य तथा देहे सबाह्याभ्यन्तरे स्थितः ॥ 4.
उल्का तरुतो यथा कश्चिद्द्रव्यमालोक्य तां त्यजेत् ।
योगीवत्कोयमालोक्य तथा ज्ञानं परित्यजेत् ॥ 5
पुष्पवत्तु सकलं विद्याद्गन्धस्तत्रैव निष्कलः ।

In Public domain. Digitization Muthulakshmi Research Academy

वृक्षान्तु सकलं रुकन्दुद्या तरुरेव विष्कल्प ॥6.
सकलाकल धीबेल सर्वत्रैव व्यवस्थितः ।
सकले सकलं विद्यान्निष्कले निष्कलन्तथा ॥7.
मेक्षात्रस्तु द्विमात्रस्तु शिक्षात्रस्तथैव च ।
अर्धमात्रः परस्तूक्ष्मस्तारत्वाच्चूर्ध्वं परात्परम् ॥8.
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च शिवस्तथा ।
पञ्चधा पञ्चदैवत्यः सकलः परिपठ्यते ॥9
ब्रह्मणो हृदयं स्थानं कण्ठे विष्णुस्समाश्रितः ।
तालुमध्ये स्थितो रुद्रो भ्रूमध्ये तु महेश्वरः ॥10
मस्तिष्के तु शिवं विद्यात्तत्परात्परम् ।
परात्परतरन्नास्ति इति शास्त्रस्य निश्चयः ॥11
कार्तिकेय उवाच ।
गणानाम्कथन्तस्य केवलं वीर्यते तु सः ।
संशयोमे महादेव कथयस्व यथार्थतः ॥12.
ईश्वर उवाच ।
शक्त्या तु वीर्यते जीवस्तत्किमन्प्राप्ते निवर्तते ।
तस्यान्तं संप्रविश्यापि शृणु षण्मुख तत्वतः ॥13
कैवल्यन्तं तु तं विद्यान्नाकान्तं शास्त्रसङ्गमम् ।
अन्तस्थितं विजानीयात्तत्रस्थो व्यापयेत्प्रभुः ॥14.
मनोव्यक्तमव्यक्तं विक्षिप्तश्चक्षुरव्यय पालितम् ।

In Public domain. Digitization Muthulakshmi Research Academy

तथापि योगिनां बोधोप्यविधिपूर्वकः प्रवर्तते ॥ 15.
परतत्परकं मुख्यं परतत्परकं पदम् ।
परतत्परकं ब्रह्म परतत्परमाक्षरम् ॥ 16.
ज्ञातः परतरं ज्ञानज्ञातः परतरं शिवम् ।
ज्ञातः परतरं किंचिदित्याह भगवान्शिवः ॥ 17.
शिवज्ञानामृतं प्रोक्तं संक्षेपात्कथनात् विस्तरात् ।
अथवा तत्त्वदैवैक्यात् परमाक्षरनिर्णयम् ॥ 18.
एतादृक् शिवरूपत्वं शिवत्वप्राप्तिविस्तृतम् ।
मुख्यान्मुख्यतरं मुख्यं मंतव्यं प्रयत्नतः ॥ 19.
नापुत्राय प्रदातव्यं न शिष्याय कदाचन ।
दैवाविनेयमूर्खाय नास्तिकाय तथैव च ॥ 20.
तस्मै देयमिति ज्ञानज्ञानव्यस्मै तु कदाचन ।
शिवज्ञानमिदं प्रोक्तं सत्यं सत्यं मयातव ॥ 21.
एवं ज्ञात्वा तु मेधावी विचरेत्तम यथासुखम् ।
गृहस्थो ब्रह्मचारी वा ज्ञानप्रस्थोऽथ भिक्षुकः ॥ 22.
यत्र तत्र स्थितो ज्ञानी परमाक्षरचिंतकः ।
विषयी विषयासक्तो यातिदेहान्तिके शिवम् ॥ 23
ज्ञानादेवास्य शास्त्रस्य पापकर्मोपि मानवः ।
ब्रह्महत्यादिभिर्दोषैः पुण्यपापैर्न लिप्यते ॥ 24
योक्तो बोधकरश्चैव मोक्षदस्तु परस्मृतः ।

In Public domain. Digitization Muthulakshmi Research Academy

इत्येतत्त्रिविधा दीक्षा आचार्यैस्तु यतीततले ॥ 25
दीक्षणी कर्मणैवमार्गक बोधक ध्यान मादिशेत् ।
मोक्षदस्तु परतत्वक यं ज्ञात्वा न निवर्तते ॥ 26
इति श्रीमद्कामिकेऽग्नीषोमीयोत्तरे महातन्त्रे
भावनाध्यान पटलस्समाप्तः ॥ श्लो. 104½.

— ४ —

51. 8. अग्नीषोमः ॥

अग्नि मध्ये रविध्यानक रविमध्ये तु भावनाः।
तत्र ध्येयात्मकुरो दिव्यजातः सृष्टिः प्रवर्तते ॥ 1
सृष्टिन्यासक्रमयोत्र विस्तरेण पुरेरितम् ।
भावतं चेतयेत्तत्रिभवनकृतं साधकोत्तमः ॥ 2
अग्नीषोमात्मकं सर्वम् जगत्स्थावरजङ्गमम् ।
विपरीतं चिन्तयेत्तत्रिभवन सिद्धिकामस्समाहितः ॥ 3
सर्वेहं चिन्तयेद्विद्वान्दिव्यरूपमनौपमम् ।
यस्य यत्कर्म निर्दिष्टम् तस्य तत्तिन्तयेद्बुधः ॥ 4
इदं योऽभ्यसते ध्यानमकृतं सर्वतो मुखम् ।
अनिरेणैव कालेन स सिद्धिफलमाप्नुयात् ॥ 5
सृष्टिन्यासमविज्ञाय कथं कुर्वीत साधकः ।
धनलीव मुखिना कार्यं कुर्वन्ति नृपानिव ॥ 6
इति श्रीमद्कामिकेऽग्नीषोमीयोत्तरे महा-
तन्त्रे अग्नीषोमीयोध्यायः पटलः ॥
श्लो. 110½

In Public domain. Digitization Muthulakshmi Research Academy

प्रासादः ॥

प्रासाद माक्रमुत्थाय सन्नतनु जपेद्धरिं ।
षण्मासात्सिद्धिमाप्नोति योगयुक्तो न संशयः ॥ 1
यस्मात्तस्मात्य जपेत सर्वपापक्षयो भवेत् ।
अणिमादि गुणैश्वर्यम् यद्विर्मासैरवाप्नुयात् ॥ 2
यथातथं विदित्वा तु मुच्यते नात्र संशयः ।
तत्त्वयस्तत्त्वयो भूत्वा षण्मासात्सिद्धिमाप्नुयात् ॥ 3.
स्थूलसूक्ष्मः परश्चेति प्रासादः कथितो मया ।
प्रासादं ये न जानन्ति तेषां जन्मनि सङ्कटम् ॥ 4.
इति श्रीमद्भानुष्ठ धैर्ये प्रकीर्तिते कालोत्तरे मंत्रातन्त्रे
प्रासादपटलो नवमः ॥ 5. 114½

———×———

प्रासादलक्षणम् ॥

अतः परं प्रवक्ष्यामि प्रासादस्य तु लक्षणम् ।
त्रयो वर्णाः स्थूलश्चेति लक्षयेत्तत्त्वमात्मनः ॥ 1
त्रयो वर्णाः स्थिते पापानि क्षीणे मोक्षप्रदो भवेत् ।
आद्यायते स्थूलश्चेति मूर्तिर्भवेत्तु निर्मितः ॥ 2.
स्थूलस्तेजोमयः प्रोक्तो वस्त्रोच्चाटनधारणः ।
स्थूलोक्ते त्रिविधं लक्षणम् स्थूलो नात्र संशयः ॥ 3.
क्षीणश्चोच्चाटयेत्तिक्ष्णम् स्फटिकेन विनिर्मितः ।

In Public domain. Digitization Muthulakshmi Research Academy

आकर्षणे च लक्ष्यस्य फट्कारो मारणे स्मृतः ॥ 4

आकर्षणे च लक्ष्यमाकृष्टौ संप्रकीर्तितम् ।

आकर्षयेद्ध्रुवं युक्तो बीजबाणांशुतैरपि ॥ 5.

दाहमाकर्षणेत्साध्यम् बाधं ज्ञात्वा तु तत्त्वतः ।

साधकस्य भवेद्वृद्धी व्ययुना साध्यस्य कीर्तिता ॥ 6.

दाहं ज्ञात्वा तु बोधावी आकर्षं कुरुते ध्रुवम् ।

अविधित्वा विधं सम्यग्बुद्धिमान्सिध्यति साधकः ॥ 7.

बीजं कृत्वा तु पूर्वोक्तं मन्त्रस्यार्घं प्रकल्पयेत् ।

सेकं कृत्वा तु मन्त्रस्य जपं कुर्याद्विचक्षणः ॥ 8.

देवस्य दक्षिणामूर्तौ पञ्चलक्षं स्थितो भवेत् ।

जपान्ते घृतहोमस्तु दशसाहस्रिको भवेत् ॥ 9.

विधिव्याप्तविधिनो मन्त्रः कर्मयोग्यो भवेत्ततः ।

शुक्लादि यानि कर्माणि तानि सिध्यन्ति संशयः ॥ 10.

कल्पोक्तं जपेदादौ जलस्थस्थान वासिनः ।

वश्यादाप्तादि वैतस्य मन्त्रस्येति विनिश्चयः ॥ 11

लक्षपञ्चदशं जप्त्वा दशग्रामनिवासिनः ।

तेजसा वश्यमाप्नोति धनेनात्मनापि च ॥ 12.

जपेत्त्रिंशतिलक्षैस्तु प्रासादस्य पदानन ।

दैवी देवाधिपं मन्त्री निधनं वशमानयेत् ॥ 13.

पञ्चविंशतिलक्षैस्तु विषयं वशमानयेत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

T.317.A

नैर्ऋत्यां तु भवेत् पूर्वं पश्चिमं वायुकोणकम् ॥ 14.
पश्चिमे तु भवेत् पूर्वं उत्तरं वायुकोणकम् ।
उत्तरे तु भवेत् पूर्वं ईशानं पश्चिमं भवेत् ॥ 15.
पश्चात्तु ऊर्ध्वजापेन विद्याधरपतिर्भवेत् ।
तत्रैव भोगिनो कालम् यावदाभूत संप्लवम् ॥ 16.
इति श्रीमत्कालोत्तरे क्रियाकालोत्तरे भूतादयो
प्रासादलक्षणपटलो दशमः ॥ ॥ छ ॥ 130½.

— x —

ज्ञानविज्ञानपटलः ॥
कार्तिकेय उवाच ।
अद्यापि संशयो देव ज्ञानविज्ञानयोः प्रभो ।
कथं तत् साध्यते ज्ञानम् कथं वा कोऽधिगच्छति ॥ 1.
ईश्वर उवाच ॥
आधारन्तु पुरा ज्ञात्वा पश्चादाधेयकल्पना ।
आधाराधेयवित्प्राज्ञः समर्थः सर्वकर्मसु ॥ 2.
पुरमाधारमित्युक्तम् आधेयस्त्वीश उच्यते ।
ईशो निवासमेतस्मिन् यस्मादेतदिति स्मृतः ॥ 3.
ईशं विद्याद्धि देवानां यस्मादेतन्नियच्छति स्वयम् ।
पुर्यष्टकमनाद्यन्तं लिङ्गमित्यभिधीयते ॥ 4.
शब्दस्पर्शं च रूपं च रसो गन्धश्च पञ्चमः ।

In Public domain. Digitization Muthulakshmi Research Academy

बुद्धिर्मनस्त्वहङ्कारः पुर्यष्टकमितिस्मृतम् ॥ 5.
यावद्दीर्घं भवेत् कर्म तावत्कालं भवेदिह ।
शरीरमात्मनस्त्यक्त्वा स्वर्गं गच्छति वा पुनः ॥ 6.
स्वप्नवत्तन्मृषा त्यक्त्वा बुद्ध्यहङ्कारचोदितं ।
मनोविकल्पं देवेत्यक्त्वा धर्मैर्मुक्तस्तिरोभवेत् ॥ 7.

इति श्रीमद्भागवते महापुराणे कलिकालेतिहासे महातन्त्रे
योगविद्यायां पञ्चमोऽध्यायः ॥ 137½.

— ४ —

कालचक्रम् ॥

कालचक्रविधानन्तु प्रवक्ष्यामि यतो मुनेः ।
कालचक्रविधिं श्रुत्वा येन कालेन मुच्यते ॥ 1.
ह्रस्वाक्षरोच्चारेण अल्पायुः स जीवति ।
ह्रस्वोच्चारप्रचारेण अल्पदुःखं स जीवति ॥ 2.
ऋत्योच्चारप्रचारेण अल्पमेकं स जीवति ।
यथा वामा तथा याम्या मध्यमा न तथैव च ॥ 3.

कालचक्रं समाश्रित्य ध्रुवस्थैर्यादिकौशलं ॥ 3½

इति श्रीमद्भागवते महापुराणे कलिकालेतिहासे कालचक्रोपदेशो नाम षष्ठोऽध्यायः ॥ 6. 141.

— ४ —

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहस्तकुक्कारिकाख्यानकम् ॥

यथा हस्तकुक्कार्यौ तु प्रीत्यानयोर्वयम् व्यवस्थिते।
एका संयोजयेते तत्र द्वितीय दुःखमाप्नुयात् ॥ 1

संयोगाद्धस्तकुक्कं मेदे कथयिष्यसि तत्त्वतः ।
कथयिष्यामि मेदे कुक्कं यत्ने अविषयाति ॥ 2

कुक्कता मागतान्दृष्ट्वा परिव्रजय स कौक्कुटः ।
यत्नया पूर्वकुक्किष्ट्वा मागतान्दृष्ट्वा ॥ 2.

अहाका तद्दृष्ट्वा कुक्कं यत्नया प्रभुकोदितम् ।
ततो नाचक्रवीक्षुद्धा किन्नया यत्यसन्निधौ ॥ 3.

दृष्ट्वा तादृशं नैति अनौपक्यप्रत्ययं यतः ।
संयोगाद्धस्तकुक्कं मेदे जायते न तद्वत्या ॥ 4.

अन्यथा नैवृहाक्योक्तम् प्रत्यक्षतेव जायते ।
अन्धकुपतनन्यत्र तत्रस्थात् कायिकुक्कैव शाकयेते ॥ 5.

अनिरेव कालेन संप्राप्तं तत्कुक्कनत्या ।
यत्नया पूर्वकुक्किष्ट्वा तत्रैव न संशयः ॥ 6.

अज्ञानाकुक्कनीत्वेव वक्तुकन्तु प्रियं मया ।
तत्रस्थान्न प्रियो मेदे यथापूर्वं कुक्कनाम ॥ 7.

इति श्रीमद्धस्तकुक्कं मेदे द्वितीयकोक्तो तत्रे वृहत्कुक्कारिकाख्यानं पञ्चमस्योदयः ॥

46.1e8

— x —

In Public domain. Digitization Muthulakshmi Research Academy

प्रासादलक्षणम् ॥
कार्तिकेय उवाच ॥
पूर्वमेतत्समाख्यातं शिवभेदस्तथाष्टधा ।
कथं संभवते देव कथयस्व प्रसादतः ॥ 1.
ईश्वर उवाच ।
सकलं निष्कलं सूक्ष्मं कलाढ्यं सकलाकृतम् ।
52. ज्ञ. ज्ञापणं ज्ञानसंस्कारं कर्णोद्गन्धात्मकं स्मृतम् ॥ 2
प्रासादषष्ठसंयुक्तं पंडलैश्च समन्वितम् ।
सकलं सर्वभूतस्थं शिवतत्वं प्रकीर्तितम् ॥ 3.
स्वयमिच्छाकृतैर्यस्तु दैहत्वेनोपमाकृतः ।
निष्कलं तं विजानीयात् सकलार्णरहितं शिवम् ॥ 4
निश्चलोर्ध्वाकृतिं मित्वा स्थितदैर्घ्यं काष्ठवत् ।
सूक्ष्मतत्तु विजानीयादूर्ध्वरेखेण विभावयेत् ॥ 5.
तुर्यकोणकरेणैव यत्तत्वं भूयते भुवि ।
कलातत्वं तदित्याहुराकाशस्थं न संशयः ॥ 6.
ऊर्ध्वबाहुस्थकीर्णस्य यत्कलं परिकीर्तितम् ।
तत्स्थलत्रिकुजानीयादाकाशस्थं सकलं कृतम् ॥ 7.
व्याप्तेन तुर्यकोणेन श्रुत्वा देवं जगद्गुरुम् ।
कुरु ज्ञापनमित्युक्तस्तत्तज्ज्ञापनं स्मृतम् ॥ 8.
अधो बाहुस्थकीर्णस्य यत्कलं संव्यवस्थितम् ।

In Public domain. Digitization Muthulakshmi Research Academy

अन्तरस्थं तालुजानीयादनुच्चार्यं प्रकीर्तितम् ॥ 9.
अष्टवर्णाष्टमैकोक्तिः सप्तस्वरस्य द्वितीयकम् ।
वर्णातीतं षडन्तं च सप्तमे त्रिचतुर्थकम् ॥ 10.
आदिं च ध्रुवमेवेत्थम् षष्ठं वै प्रथमस्वरस्य तु ।
वसोरवर सवाक्युक्तम् कण्ठोष्ठ्यं चाष्टमं स्मृतम् ॥ 11.
इति वैहारसंस्कारव्याता अणिमाद्याधिसाधनाः ।
अनुच्चार्यमनक्षिन्धम् मोक्षस्येति विधीयते ॥ 12.

इति श्रीमद्वीरागमकालोत्तरे सकलविष्णुकल्पादि-
दीक्षाचतुर्दशः पटलः ॥ ओ. 160.

——— × ———

व्याप्तिः ॥
कार्तिकेय उवाच ॥
कथं व्यापी अधश्चोर्ध्वम् तिर्यक्चैव कथं भवेत् ।
तत्त्वे भूते सद्भावम् कारणात्तु महेश्वर ॥ 1
ईश्वर उवाच ।
यावद्भूते स्थितो जन्तुरधस्तावत्प्रकीर्तितम् ।
व्याप्तीति निर्गतस्तिर्यगन्तरश्चोर्ध्वगतस्तु यः ॥ 2
त्रिमार्गावस्थितं जन्तुम् सर्वहेतुषु साधनः ।
अविदित्वा नमुच्येत यस्त्वेतान्मुनयो भवेत् ॥ 3.
त्रिमार्गं त्रिरधिष्ठानम् सर्वहेतुषु वर्तते ।

In Public domain. Digitization Muthulakshmi Research Academy

यो वेत्ति व्यापिकां व्याप्तिं न व्यापी तु न संशयः॥ 4
तावद्भ्रमति संसारे यावद्व्याप्तिं न विन्दति ।
विदित्वा व्यापिनं देवं मुच्यते नात्र संशयः॥ 5.
यथा तृणं कुक्कुटस्तु तृणाग्रं यावदागता ।
उपरिष्टान्निरालक्ष्या तद्वज्जीवोत्र संस्थितः॥ 6.
ऊर्ध्वहृदयं मध्यहृदयं मध्ये हृदयनिरासयम् ।
त्रिहृदयं यो विजानाति मुच्यतेसौ ध्रुवं गुरुः॥ 7.
व्याप्तिश्चालव्य मया प्रोक्ता संक्षेपान्न तु विस्तरात् ।
अतः परतरन्नास्ति व्यापकं व्यापकत्व तु॥ 8.

इति श्रीमद्भिक्षाटने कालोत्तरे व्याप्तिपटलः पञ्चदशः॥

——— x ——— ✍ 168

प्रत्ययः॥
अतः परं प्रवक्ष्यामि अष्टधा प्रत्ययो यथा ।
अनग्निदग्धलक्षं चैव वृक्षच्यालभक्षलक्षणा॥ 1.
पाषाणां स्तोभनं चैव महापातकनाशनम् ।
विषलक्षणं चैव विषविषीकरणन्तथा॥ 2.
ग्रहज्वरविनाशी च प्रत्ययोष्टविधस्त्वयम् ।
एवं ज्ञात्वा च विधिवत् व्याप्तिं सर्वत्र जायते॥ 3.
ॐ जय. ह्रीं जय. श्रीवत्स ॐ ।
अग्नि स्तोभनि श्रीकण्ठसहस्रोद्घात सक्षुत ॐ ।

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चाक्षर प्रयोगेण उच्चाटयानि वर्ण संख्या ॥ ४.
ॐ ह्रीं श्रीं क्लीं ब्लूं ॐ नमः ।
अर्ध-मूल-मंत्रं तं त्रिधा जपेत् प्रयोग रूपं प्रवर्तयति ॥
ॐ ह्रीं श्रीं क्लीं ब्लूं ॐ नमः । ५. 53.9.
पुनरावृत्या पुनरपि रुद्धाति स्तम्भनं करोति ॥ ५.
ॐ ह्रीं श्रीं क्लीं ब्लूं ॐ नमः ।
पुनरावृत्या तत्र शीतला वारणेन तु ।
स जीवति पुनर्वृद्धो यथा पूर्वं तथैव च ॥ ६.
ॐ ह्रीं श्रीं क्लीं ब्लूं ॐ नमः ।
प्रथमे नेष्टनेत्राय पाषाणां शीघ्रकारक ॥ ।
मारणं रुद्धनाशं रुद्धाति: पतनीति च संख्या ॥ ७.
ॐ ह्रीं श्रीं क्लीं ब्लूं ॐ नमः ।
उच्चाटने प्रयोगाय सर्व भूतेषु तत्क्षिप्त ।
तावद्धि यावदुच्चाटं याति प्रयत्नात ॥ ८.
ॐ ह्रीं श्रीं क्लीं ब्लूं ॐ नमः ।
तत्रा पुरुष योगेन रुद्धाटं रुद्धते तु ।
महापातक सञ्जातं विधिवत्संप्रकीर्तितम् ॥ ९.
अत प्रयोगेण चाय स्तुरुत्वं याति च आयते ।
ॐ ह्रीं श्रीं क्लीं ब्लूं ॐ नमः ।
पुनरावृत्ये चाय लघुत्वं आयते यथा ॥ १०.
ॐ ह्रीं श्रीं क्लीं ब्लूं ॐ नमः ।

In Public domain. Digitization Muthulakshmi Research Academy

विषसंहारभैरवोक्तम् सौतसा वारुणीव तु ।
उत्पाताष्टहरीतकैव विषं संहरति ध्रुवम् ॥ 11
अनग्निजवलेन यदूर्ध्वविरेकी करणे तथा ।
क्षौद्रैः पञ्चाक्षिरुत्पीतैर्विरेकीव विधीयते ॥ 12.
ॐ हूं हूं फण्णमः ।
प्रयोगो विषुवेनाथम् प्रवाहेण प्रयोजितः ।
उत्पाताष्टहरीतक्या गृहनाशयति ध्रुवम् ॥ 13.
ॐ हूं फट् ॐ लैं फट् ॐ हूं फट् ॐ फट् फट् फट् फट्
सौतसावयमपि क्षिप्रम् वारुणीव तु योजितः ।
उत्पाताष्टहरीतक्या प्रयोगो ज्वरनाशनः ॥ 14.
अष्टानां प्रत्ययानां तु प्रयोगाः कथिता मया ।
ज्ञात्वा ज्ञात्वा प्रयुञ्जीत विधिवैद्यो सौतसः ॥ 15.
इति श्रीमद्वानुकभैरवे कक्षीवतिकालोत्तरे महातन्त्रे
अष्टधा प्रत्ययः षोडशः पटलः ॥ ❀. 163.

— ✕ —

प्रासादलक्षणम् ॥
कार्तिकेय उवाच ।
प्रासादः कीदृशो देयो यादिस्तस्यैव कीदृशी ।
प्रभूतिः कीदृशी तस्य कथयस्व महेश्वर ॥ 1
ईश्वर उवाच ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रासादं यो न जानाति पञ्चमन्त्रमहातनुम् ।
अष्टत्रिंशत्कलायुक्तं बलं आत्मानि उच्यते ॥ 2.
प्रासादं सम्यगज्ञात्वा दीक्षां कुर्ते गुरुः ।
अधस्ताद्धि शिष्यमात्मानं नयते नात्र संशयः ॥ 3.
प्रासादलक्षणं हित्वा तद्यो यस्तु दीक्षां करोति हि ।
आचार्यस्तस्य शिष्यस्य शिवलोकं व्रजेत् ॥ 4.
कैलासनवगन्धर्वयक्षोरगेश्वरः ।
किन्नरास्सरसश्चैव सिद्धास्सर्वे प्रासादसम्भवाः ॥ 5.
ब्रह्मा विष्णुस्तथारुद्रः कन्दो वायुः प्रजापतिः ।
बृहस्पतिरथादित्यश्शुक्रश्चन्द्रो भृगुस्तथा ॥ 6.
येपि चान्ये ग्रहगणास्सर्वे प्रासादसम्भवाः ।
एते चान्ये च बहवो मुनयस्संशितव्रताः ॥ 7.
व्रजन्ति परमं स्थानं प्रासादज्ञानात् ध्रुवात् ।
विद्यानं चाऽथ वक्ष्यामि यं ज्ञात्वा मृतमश्नुते ॥ 8.
सद्योजातं कलायुक्तमकारादक्षरसम्भवम् ।
विद्यादुकारजं वामं घोरजन्तु मकारजम् ॥ 9.
बिन्दुजः पुरुषो ज्ञेयो ईशानस्तु शिवात्मजः ।
एवं मन्त्रास्तु पञ्चैते स्मृताः प्रासादसम्भवाः ॥ 10.
53.b. शतकोटि सहस्राणां बिन्दुजालानां ।
प्रासादैकैवधेष्वेव अवतीर्णा न संशयः ॥ 11.

In Public domain. Digitization Muthulakshmi Research Academy

आरुतानल शक्राद्या ये मन्त्राः परिकीर्तिताः।
प्रासादाव्जसकुत्पत्तनारसेर्वेशाबोधशक्तयः ॥ 12.
सद्यस्तु पृथिवीबीजो वामोरुह्यपः प्रकीर्तितः ।
अघोरस्तेजसद्युक्तो वायुरुतत्पुरुषरुतः ॥ 13.
आकाशस्तु भवेद्बीजः स्वयन्देवो महेश्वरः ।
सद्योजातस्तु मन्त्रेशो वामदेवो मरुत्स्मृतः ॥ 14.
अघोरस्साक्ष नैऋतस्तु पुरुषोधर्व उच्यते ।
पञ्चमं यत्परं सूक्ष्मम् व्योमव्यापि सदाशिवः ॥ 15
सद्यो जातस्तु वै ब्रह्मा वामो विष्णुः प्रकीर्तितः।
अघोरो रुद्रदैवत्यः पुरुषश्चेश्वरस्तथा ॥ 16.
ईशानशिवदैवत्यो ह्यविद्येवाः प्रकीर्तिताः ।
षष्ठन्तु यत्परन्तत्वं सदाशिवगुणान्वितम् ॥ 17
तत्त्वं देवो न वक्तव्यः प्राकृतैर्गुणसञ्चयैः ।
ज्ञात्वा परमनिर्वाणं पञ्चसंस्थानगामिनीम् ॥ 18
ज्ञानं ज्ञातं सकृद्येन विस्मितेनात्मना ।
तत्कालं पवनुकोसौ यायज्ञानं हितं हितम् ॥ 19.

इति श्रीमत्कामिकाख्ये प्रोक्तेशानिकालोत्तरे
महातन्त्रे प्रासादज्ञानलक्षणपटलस्समाप्तः ॥
ग्रन्थाग्रं 202.

॥ समाप्तश्चायम् ग्रन्थः ॥

In Public domain. Digitization Muthulakshmi Research Academy